# Tarashatanamastotra from Brihannilatantra

# તારાશતનામસ્તોત્રમ્ બૃહન્નીલતન્ત્રાર્ગતમ્

## Document Information

Text title : tArAshatanAmastotram 2 bRRihannIlatantrAntargatam

File name : tArAshatanAmastotrambRRihannIla.itx

Category : aShTottarashatanAma, devii, dashamahAvidyA, stotra, devI

Location : doc_devii

Transliterated by : muktabodha.org

Proofread by : DPD

Description-comments : Brihannilatantra See corresponding nAmAvalI

Latest update : March 8, 2013

Send corrections to : sanskrit@cheerful.com

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

September 30, 2022

*sanskritdocuments.org*

# તારાશતનામસ્તોત્રમ્ બૃહન્નીલતન્ત્રાર્ગતમ્

શ્રીદેવ્યુવાચ ।
સર્વં સંસૂચિતં દેવ નામ્નાં શતં મહેશ્વર ।
યત્નૈઃ શતૈર્મહાદેવ મયિ નાત્ર પ્રકાશિતમ્ ॥ ૧॥

પઠિત્વા પરમેશાન હઠાત્ સિદ્ધ્યતિ સાધકઃ ।
નામ્નાં શતં મહાદેવ કથયસ્વ સમાસતઃ ॥ ૨॥

શ્રીભૈરવ ઉવાચ ।
શ‍ૃણુ દેવિ પ્રવક્ષ્યામિ ભક્તાનાં હિતકારકમ્ ।
યજ્જ્ઞાત્વા સાધકાઃ સર્વે જીવન્મુક્તિમુપાગતાઃ ॥ ૩॥

કૃતાર્થાસ્તે હિ વિસ્તીર્ણા યાન્તિ દેવીપુરે સ્વયમ્ ।
નામ્નાં શતં પ્રવક્ષ્યામિ જપાત્ સ(અ)ર્વજ્ઞાદાયકમ્ ॥ ૪॥

નામ્નાં સહસ્રં સંત્યજ્ય નામ્નાં શતં પઠેત્ સુધીઃ ।
કલૌ નાસ્તિ મહેશાનિ કલૌ નાન્યા ગતિર્ભવેત્ ॥ ૫॥

શ‍ૃણુ સાધ્વિ વરારોહે શતં નામ્નાં પુરાતનમ્ ।
સર્વસિદ્ધિકરં પુંસાં સાધકાનાં સુખપ્રદમ્ ॥ ૬॥

ॐ તારિણી તારસંયોગા મહાતારસ્વરૂપિણી ।
તારકપ્રાણહર્ત્રી ચ તારાનન્દસ્વરૂપિણી ॥ ૭॥

મહાનીલા મહેશાની મહાનીલસરસ્વતી ।
ઉગ્રતારા સતી સાધ્વી ભવાની ભવમોચિની ॥ ૮॥

મહાશઙ્ખરતા ભીમા શાઙ્કરી શઙ્કરપ્રિયા ।
મહાદાનરતા ચણ્ડી ચણ્ડાસુરવિનાશિની ॥ ૯॥

ચન્દ્રવદ્રૂપવદના ચારુચન્દ્રમહોજ્જ્વલા ।
એકજટા કુરઙ્ગાક્ષી વરદાભયદાયિની ॥ ૧૦॥

મહાકાલી મહાદેવી ગુહ્યકાલી વરપ્રદા ।
મહાકાલરતા સાધ્વી મહૈશ્વર્યપ્રદાયિની ॥ ૧૧॥

મુક્તિદા સ્વર્ગદા સૌમ્યા સૌમ્યરૂપા સુરારિહા ।
શઠવિઘ્ના મહાનાદા કમલા બગલામુખી ॥ ૧૨॥

મહામુક્તિપ્રદા કાલી કાલરાત્રિસ્વરૂપિણી ।
સરસ્વતી સરિચ્છ્રેષ્ઠા સ્વર્ગઙ્ગા સ્વર્ગવાસિની ॥ ૧૩॥

હિમાલયસુતા કન્યા કન્યારૂપવિલાસિની ।
શવોપરિસમાસીના મુણ્ડમાલાવિભૂષિતા ॥ ૧૪॥

દિગમ્બરા પતિરતા વિપરીતરતાતુરા ।
રજસ્વલા રજઃપ્રીતા સ્વયમ્ભૂકુસુમપ્રિયા ॥ ૧૫॥

સ્વયમ્ભૂકુસુમપ્રાણા સ્વયમ્ભૂકુસુમોત્સુકા ।
શિવપ્રાણા શિવરતા શિવદાત્રી શિવાસના ॥ ૧૬॥

અટ્ટહાસા ઘોરરૂપા નિત્યાનન્દસ્વરૂપિણી ।
મેઘવર્ણા કિશોરી ચ યુવતીસ્તનકુઙ્કુમા ॥ ૧૭॥

ખર્વા ખર્વજનપ્રીતા મણિભૂષિતમણ્ડના ।
કિઙ્કિણીશબ્દસંયુક્તા નૃત્યન્તી રક્તલોચના ॥ ૧૮॥

કૃશાઙ્ગી કૃસરપ્રીતા શરાસનગતોત્સુકા ।
કપાલખર્પરધરા પઞ્ચાશન્મુણ્ડમાલિકા ॥ ૧૯॥

હવ્યકવ્યપ્રદા તુષ્ટિઃ પુષ્ટિશ્ચૈવ વરાઙ્ગના ।
શાન્તિઃ ક્ષાન્તિર્મનો બુદ્ધિઃ સર્વબીજસ્વરૂપિણી ॥ ૨૦॥

ઉગ્રાપતારિણી તીર્ણા નિસ્તીર્ણગુણવૃન્દકા ।
રમેશી રમણી રમ્યા રામાનન્દસ્વરૂપિણી ॥ ૨૧॥

રજનીકરસમ્પૂર્ણા રક્તોત્પલવિલોચના ।
ઇતિ તે કથિતં દિવ્યં શતં નામ્નાં મહેશ્વરિ ॥ ૨૨॥

પ્રપઠેદ્ ભક્તિભાવેન તારિણ્યાસ્તારણક્ષમમ્ ।
સર્વાસુરમહાનાદસ્તૂયમાનમનુત્તમમ્ ॥ ૨૩॥

ષણ્માસાદ્ મહદૈશ્વર્યં લભતે પરમેશ્વરિ ।
ભૂમિકામેન જપ્તવ્યં વત્સરાત્તાં લભેત્ પ્રિયે ॥ ૨૪॥

ધનાર્થી પ્રાપ્નુયાદર્થં મોક્ષાર્થી મોક્ષમાપ્નુયાત્ ।
દારાર્થી પ્રાપ્નુયાદ્ દારાન્ સર્વાગમ(પુરો?પ્રચો)દિતાન્ ॥ ૨૫॥

અષ્ટમ્યાં ચ શતાવૃત્ત્યા પ્રપઠેદ્ યદિ માનવઃ ।
સત્યં સિદ્ધ્યતિ દેવેશિ સંશયો નાસ્તિ કશ્ચન ॥ ૨૬॥

ઇતિ સત્યં પુનઃ સત્યં સત્યં સત્યં મહેશ્વરિ ।
અસ્માત્ પરતરં નાસ્તિ સ્તોત્રમધ્યે ન સંશયઃ ॥ ૨૭॥

નામ્નાં શતં પઠેદ્ મન્ત્રં સંજપ્ય ભક્તિભાવતઃ ।
પ્રત્યહં પ્રપઠેદ્ દેવિ યદીચ્છેત્ શુભમાત્મનઃ ॥ ૨૮॥

ઇદાનીં કથયિષ્યામિ વિદ્યોત્પત્તિં વરાનને ।
યેન વિજ્ઞાનમાત્રેણ વિજયી ભુવિ જાયતે ॥ ૨૯॥

યોનિબીજત્રિરાવૃત્ત્યા મધ્યરાત્રૌ વરાનને ।
અભિમન્ત્ર્ય જલં સ્નિગ્ધં અષ્ટોત્તરશતેન ચ ॥ ૩૦॥

તજ્જલં તુ પિબેદ્ દેવિ ષણ્માસં જપતે યદિ ।
સર્વવિદ્યામયો ભૂત્વા મોદતે પૃથિવીતલે ॥ ૩૧॥

શક્તિરૂપાં મહાદેવીં શ‍ૃણુ હે નગનન્દિનિ ।
વૈષ્ણવઃ શૈવમાર્ગો વા શાક્તો વા ગાણપોઽપિ વા ॥ ૩૨॥

તથાપિ શક્તેરાધિક્યં શ‍ૃણુ ભૈરવસુન્દરિ ।
સચ્ચિદાનન્દરૂપાચ્ચ સકલાત્ પરમેશ્વરાત્ ॥ ૩૩॥

શક્તિરાસીત્ તતો નાદો નાદાદ્ બિન્દુસ્તતઃ પરમ્ ।
અથ બિન્દ્વાત્મનઃ કાલરૂપબિન્દુકલાત્મનઃ ॥ ૩૪॥

જાયતે ચ જગત્સર્વં સસ્થાવરચરાત્મકમ્ ।
શ્રોતવ્યઃ સ ચ મન્તવ્યો નિર્ધ્યાતવ્યઃ સ એવ હિ ॥ ૩૫॥

સાક્ષાત્કાર્યશ્ચ દેવેશિ આગમૈર્વિવિધૈઃ શિવે ।
શ્રોતવ્યઃ શ્રુતિવાક્યેભ્યો મન્તવ્યો મનનાદિભિઃ ॥ ૩૬॥

ઉપપત્તિભિરેવાયં ધ્યાતવ્યો ગુરુદેશતઃ ।
તદા સ એવ સર્વાત્મા પ્રત્યક્ષો ભવતિ ક્ષણાત્ ॥ ૩૭॥

તસ્મિન્ દેવેશિ પ્રત્યક્ષે શ‍ૃણુષ્વ પરમેશ્વરિ ।

ભાવૈર્બહુવિધૈર્દેવિ ભાવસ્તત્રાપિ નીયતે ॥ ૩૮॥

ભક્તેભ્યો નાનાઘાસેભ્યો ગવિ ચૈકો યથા રસઃ ।
સદુગ્ધાખ્યસંયોગે નાનાત્વં લભતે પ્રિયે ॥ ૩૯॥

તૃણેન જાયતે દેવિ રસસ્તસ્માત્ પરો રસઃ ।
તસ્માત્ દધિ તતો હવ્યં તસ્માદપિ રસોદયઃ ॥ ૪૦॥

સ એવ કારણં તત્ર તત્કાર્યં સ ચ લક્ષ્યતે ।
દૃશ્યતે ચ મહાદે(વ?વિ)ન કાર્યં ન ચ કારણમ્ ॥ ૪૧॥

તથૈવાયં સ એવાત્મા નાનાવિગ્રહયોનિષુ ।
જાયતે ચ તતો જાતઃ કાલભેદો હિ ભાવ્યતે ॥ ૪૨॥

સ જાતઃ સ મૃતો બદ્ધઃ સ મુક્તઃ સ સુખી પુમાન્ ।
સ વૃદ્ધઃ સ ચ વિદ્વાંશ્ચ ન સ્ત્રી પુમાન્ નપુંસકઃ ॥ ૪૩॥

નાનાધ્યાસસમાયોગાદાત્મના જાયતે શિવે ।
એક એવ સ એવાત્મા સર્વરૂપઃ સનાતનઃ ॥ ૪૪॥

અવ્યક્તશ્ચ સ ચ વ્યક્તઃ પ્રકૃત્યા જ્ઞાયતે ધ્રુવમ્ ।
તસ્માત્ પ્રકૃતિયોગેન વિના ન જ્ઞાયતે ક્વચિત્ ॥ ૪૫॥

વિના ઘટત્વયોગેન ન પ્રત્યક્ષો યથા ઘટઃ ।
ઇતરાદ્ ભિદ્યમાનોઽપિ સ ભેદમુપગચ્છતિ ॥ ૪૬॥

માં વિના પુરુષે ભેદો ન ચ યાતિ કથઞ્ચન ।
ન પ્રયોગૈર્ન ચ જ્ઞાનૈર્ન શ્રુત્યા ન ગુરુક્રમૈઃ ॥ ૪૭॥

ન સ્નાનૈસ્તર્પણૈર્વાપિ નચ દાનૈઃ કદાચન ।
પ્રકૃત્યા જ્ઞાયતે હ્યાત્મા પ્રકૃત્યા લુપ્યતે પુમાન્ ॥ ૪૮॥

પ્રકૃત્યાધિષ્ઠિતં સર્વં પ્રકૃત્યા વઞ્ચિતં જગત્ ।
પ્રકૃત્યા ભેદમાપ્નોતિ પ્રકૃત્યાભેદમાપ્નુયાત્ ॥ ૪૯॥

નરસ્તુ પ્રકૃતિર્નૈવ ન પુમાન્ પરમેશ્વરઃ ।
ઇતિ તે કથિતં તત્ત્વં સર્વસારમનોરમમ્ ॥ ૫૦॥

ઇતિ શ્રીબૃહન્નીલતન્ત્રે ભૈરવભૈરવીસંવાદે તારાશતનામ
તત્ત્વસારનિરૂપણં વિંશઃ પટલઃ ॥ ૨૦॥

Proofread by DPD

*Tarashatanamastotra from Brihannilatantra*
pdf was typeset on September 30, 2022

Please send corrections to *sanskrit@cheerful.com*